# Narayana Ashtakam

# નારાયણાષ્ટકમ્

## Document Information

Text title : nArAyaNAShTakam

File name : nArAyaNAShTaka.itx

Category : aShTaka, vishhnu, narayana, vishnu

Location : doc_vishhnu

Author : Kuresha Swami

Transliterated by : Gayathri V vgayu at yahoo.com

Proofread by : Gayathri V vgayu at yahoo.com

Latest update : May 31, 2011

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# નારાયણાષ્ટકમ્

વાત્સલ્યાદભયપ્રદાનસમયાદાર્ત્તાર્તિનિર્વાપણાદ્-
    ઔદાર્ય્યાદઘશોષણાદગણિતશ્રેયઃ પદપ્રાપણાત્ ।
સેવ્યઃ શ્રીપતિરેક એવ જગતામેતેઽભવન્સાક્ષિણઃ
    પ્રહ્લાદશ્ચ વિભીષણશ્ચ કરિરાટ્ પાઞ્ચાલ્યહલ્યાધ્રુવઃ ॥ ૧॥

પ્રહ્લાદાસ્તિ યદીશ્વરો વદ હરિઃ સર્વત્ર મે દર્શય
    સ્તંભે ચૈવમિતિ બ્રુવન્તમસુરં તત્રાવિરાસીદ્ધરિઃ ।
વક્ષસ્તસ્ય વિદારયન્નિજનખૈર્વાત્સલ્યમાપાદયન્-
    નાર્ત્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૨॥

શ્રીરામોઽત્ર વિભીષણોઽયમનઘો રક્ષોભયાદાગતઃ
    સુગ્રીવાનય પાલયૈનમધુના પૌલસ્ત્યમેવાગતમ્ ।
ઇત્યુક્ત્વાઽભયમસ્ય સર્વવિદિતં યો રાઘવો દત્તવાન્-
    આર્ત્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૩॥

નક્રગ્રસ્તપદં સમુદ્ધૃતકરં બ્રહ્માદયો ભોઃ સુરા
    રક્ષન્તામિતિ દીનવાક્યકરિણં દેવેષ્વશક્તેષુ યઃ ।
મા ભૈષીરિતિ તસ્ય નક્રહનને ચક્રાયુધઃ શ્રીધરો-
    હ્યાર્ત્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૪॥

ભોઃ કૃષ્ણાચ્યુતઃ ભોઃ કૃપાલય હરે ભોઃ પાણ્ડવાનાં સખે
    ક્વાસિ ક્વાસિ સુયોધનાધ્યપહૃતાં ભો રક્ષ મામાતુરામ્ ।
ઇત્યુક્ત્તોઽક્ષયવસ્ત્રસંભૃતતનુર્યોઽપાલયદ્દ્રૌપદીમ્-
    આર્ત્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૫॥

યત્પાદાબ્જનખોદકં ત્રિજગતાં પાપૌઘવિધ્વંસનં
    યન્નામામૃતપૂરકં ચ પિબતાં સંસારસન્તારકમ્ ।
પાષાણોઽપિ યદઙ્ઘ્રિપઙ્કરજસા શાપાન્મુનેર્મોચિતો
    હ્યાર્ત્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૬॥

પિત્રા ભ્રાતરમુત્તમાસનગતં હ્યૌત્તાનપાદિર્ધ્રુવો
દૃષ્ટ્વા તત્સમમારુરુક્ષુરધિકં માત્રાઽવમાનં ગતઃ ।
યં ગત્વા શરણં યદાપ તપસા હેમાદ્રિસિંહાસનં
હ્યાર્ત્તત્રાણપરાયણઃ  સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૭॥

આર્ત્તા વિષણ્ણાઃ શિથિલાશ્ચ ભીતા ઘોરેશુ ચ વ્યાધિશુ વર્તમાનાઃ ।
સંકીર્ત્ય નારાયણશબ્દમાત્રં વિમુક્તદુઃખાઃ સુખિનો ભવન્તિ ॥ ૮॥

ઇતિ શ્રીકૂરેશસ્વામિવિરચિતં નારાયણાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Gayathri V vgayu at yahoo.com

*Narayana Ashtakam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*